©cc-by-nc-sa 2004-2024 Н.П.Лихушина
http://galenel.info/sanskrit/05-bhagavad-gita/10-vibhuti-yoga-unit.pdf

# Бхагавад-Гита

Глава 10

## भगवद्गीता। दशमोऽध्यायः

## **विभूतियोगः**

vibhūti *f* - развитие, могущество, сила, величие, великолепие; сверхъестественная способность (обычно называют 8 необычных магических способностей);

श्रीभगवानुवाच

भूय एव महाबाहो शृणु मे परमं वचः।

यत्ते ऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया॥ १॥

kāmyā *f* - желание ч.-л.;

न मे विदुः सुरगणाः प्रभवं न महर्षयः।

अहमादिर्हि देवानां महर्षीणां च सर्वशः॥ २॥

prabhava *m* - первопричина, рождение, происхождение, создатель;
sarvaśas *adv.* - полностью, целиком, всячески; вместе, в совокупности;

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।

असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः।

सुखं दुःखं भवो ऽभावो भयं चाभयमेव च॥ ४॥

dama *m* - смирение, самообладание;
śama *m* - спокойствие, мир, самообладание, владение чувствами, равнодушие;

अहिंसा समता तुष्टिस्तपो दानं यशो ऽयशः।

भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥ ५॥

samatā *f* - безразличие, равное отношение к ч.-л.;
pṛthagvidha - различный, многообразный, отличающийся от ч.-л.;

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा।

मद्भावा मानसा जाता येषां लोक इमाः प्रजाः॥ ६॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।

सो ऽविकम्पेन योगेन युज्यते नात्र संशयः॥ ७॥

vikampa - дрожащий, изменяющийся, искажающийся;

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।

इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥ ८॥

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।

कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥ ९॥

gataprāṇa (gata-prāṇa) - мертвый, бездыханный;

√bodhaya (caus. *от* √budh) наставлять, просвещать, дать понять, напоминать, сообщать;

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।

ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

anukampā *f* - сострадание;

अर्जुन उवाच

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।

पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥

dhāman *n* - место, сила, могущество; закон, порядок;
vibhu *m* - властелин, владыка, царь; бог;

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।

असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

nārada, asita, devala, vyāsa - *имена собственные;*

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।

न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।

भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

bhāvana *m* - создатель, творец; *n* создание, воздействие, представление, воображение;

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।

याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

aśeṣeṇa *adv.* - полностью, вполне, всецело, целиком;
vyāp (vi√āp) V U. - застигать, проникать, наполнять;

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।

केषु केषु च भावेषु चिन्त्यो ऽसि भगवन्मया ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।

भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मे ऽमृतम् ॥ १८ ॥

vistara *m* - распространение, множество; *In. adv.* подробно, пространно;

श्रीभगवानुवाच

हन्त ते  कथयिष्यामि दिव्या ह्यात्मविभूतयः ।

प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

hanta *ij.* - ну! ладно! вот!

prādhānya *n* - господство, преобладание, превосходство, верховенство; prādhānyatas *adv.* главным образом, в основном;

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।

अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

āśaya *m* - ложе; жилище, место обитания; живот, сердце, душа;

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।

मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

aṃśumant - лучезарный, *эпитет Солнца;*

वेदानां सामवेदो ऽस्मि देवानामस्मि वासवः ।

इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

vāsava - *эпитет Индры* (*букв.* повелитель Васу)*;*

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।

वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥

vitteśa (vitta-īśa) - владыка богатств, эпитет Куберы;
śikharin *m* - гора;

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।

सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥ २४ ॥

purodhas, purodhasa *m* - домашний или придворный жрец;
senānī *m* - военачальник, полководец;

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।

यज्ञानां जपयज्ञो ऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

akṣara - неиссякаемый; *n* слово, слог, звук; священный слог "OM"
japa - шепчущий; *m* шепот; чтение мантр, молитв или заклинаний;
sthāvara - неподвижный;

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।

गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥

aśvattha - *Ficus Religiosa,* священный баньян;
citraratha, kapila - *имена собственные;*

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।

ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

uccaiḥśravas - *имя собственное,* конь Уччайхщравас, возникший во время пахтания молочного океана;

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।

प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

āyudha *n* - оружие;
prajana *m, n* - порождение, зачатие, возникновение; *m* - порождающий;
kandarpa - *имя собственное,* бог любви Кама;
vāsuki - *имя собственное,* царь нагов Васуки;

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।

पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

yādas *n* - большое морское животное, морское чудовище;

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।

मृगाणां च मृगेन्द्रो ऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

√kal X. P. - побуждать, заставлять, гнать; направлять, уводить;
vainateya - сын Винаты, эпитет Гаруды;

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।

झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

jhaṣa *m* - рыба, морское чудовище;
srotas *n* - течение, поток; река, канал;
jāhnavī - *имя собственное,* дочь Джахну, эпитет Ганги;

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।

अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

vāda *m* - речь, разговор;

अक्षराणामकारो ऽस्मि द्वन्द्वः सामासिकस्य च ।

अहमेवाक्षयः कालो धाता ऽहं विश्वतोमुखः ॥ ३३ ॥

akāra *m* - буква или звук A;
dvandva *n* - пара; тип сложного слова с равноправными элементами;
sāmāsika *m, n* - сложное слово;

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।

कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ।

medhā *f* - мудрость, ум, проницательность, мысль;

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।

मासानां मार्गशीर्षो ऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

mārgaśirṣa (mārga-śirṣa) *m* - название месяца, соответствующего ноябрю-декабрю;
kusumākara *m* - весна;

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।

जयो ऽस्मि व्यवसायो ऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

dyūta *n, m* - игра; игра в кости;
√chal X P. caus. - обманывать, вводить в заблуждение;
vyavasāya *m* - решение, твердость, твердое намерение;

वृष्णीनां वासुदेवो ऽस्मि पाण्डवानां धनंजयः ।

मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

vṛṣṇi - вришни, *название племени;*
vāsudeva *m patron.* - сын Васудевы, *эпитет Кришны*;
dhanańjaya (dhanań-jaya) - завоеватель богатств, *эпитет Арджуны;*
vyāsa, uśanas - *имена собственные;.*

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।

मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्॥ ३८॥

guhya *n* - тайна, секрет;

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।

न तदस्ति विना यत्स्यान्मया भूतं चराचरम्॥ ३९॥

नान्तो ऽस्ति मम दिव्यानां विभूतीनां परंतप।

एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ ४०॥

uddeśatas *adv.* - кратко, ясно, отчетливо;

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।

तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्॥ ४१॥

ūrjita (p.p. *от* √ūrj - усиливаться) - сильный, мощный, крепкий, прочный, великий, важный;

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥ ४२॥

vi√ṣṭambh (vi√stambh V P., IX P.) ставить, останавливать; сооружать; подпирать, поддерживать.